National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(68): 47-51
© 2026 NJHSR
www.sanskritarticle.com

**नूक हेमसुन्दर रावु**
शोधच्छात्रः, पुराणेतिहासविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**नूक हेमसुन्दर रावु**
शोधच्छात्रः, पुराणेतिहासविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# नारदपुराणोक्तनित्यकर्मणां शास्त्रीयविमर्शः

**नूक हेमसुन्दर रावु**

**१. सारांशः**

नारदपुराणं महापुराणेषु धर्मप्रधानग्रन्थत्वेन प्रसिद्धम्। पुराणेऽस्मिन् वर्णाश्रमधर्मसदाचारभक्तिदान-व्रतनित्यनैमित्तिकादिकर्माणि विस्तरेण निरूपितानि सन्ति। नित्यकर्माणि मनुष्यस्य दैनन्दिनजीवनस्य आधारभूतधर्मकार्याणि सन्ति। एतानि न केवलं धार्मिकदृष्ट्या महत्त्वपूर्णानि, अपितु शारीरक-मानसिक-आध्यात्मिकशुद्धिसाधनरूपाण्यपि भवन्ति। नारदपुराणे ब्राह्ममुहूर्तोत्थानम्, शौचम्, स्नानम्, संध्योपासना, गायत्रीजपः, देवपूजा, स्वाध्यायः, दानम्, तर्पणम् इत्यादीनां नित्यकर्मणां विधिः, स्वरूपम्, फलम्, अकरणदोषाश्च सम्यगुपवर्णिताः सन्ति। प्रस्तुते शोधलेखे नारदपुराणोक्तनित्यकर्मणां शास्त्रीयस्वरूपम्, वैदिकाधारः, सामाजिकाध्यात्मिकमहत्त्वं च विवेच्यते।

**२. प्रमुखशब्दाः**

नारदपुराणम्, नित्यकर्म, धर्मः, संध्योपासना, गायत्रीजपः, देवपूजा, स्वाध्यायः, तर्पणम्, दानम्, शास्त्रीयविमर्शः।

**३. प्रस्तावना**

भारतीयसंस्कृतौ धर्मः मानवजीवनस्य मूलाधारः परिगण्यते। धर्मस्य स्वरूपं वेदेषु प्रतिपादितं, तस्य व्यावहारिकविवेचनं स्मृतिषु पुराणेषु च विस्तरेण दृश्यते। पुराणानि वेदस्योपबृंहणग्रन्थत्वेन प्रख्यातानि। अत एव महाभारते—

**इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।** (महाभारतम्, आदिपर्व, 1.1.267)

इति प्रतिपादितम्।

अष्टादशमहापुराणेषु नारदपुराणस्य विशिष्टं स्थानमस्ति। पुराणेऽस्मिन् धर्मस्य व्यावहारिकस्वरूपं, वर्णाश्रमधर्माः, नित्यनैमित्तिककर्माणि, भक्तियोगः, तीर्थमहिमा, दानधर्मः, प्रायश्चित्तानि च सविस्तरं प्रतिपादितानि सन्ति। विशेषतः नित्यकर्माणि मानवस्य दैनन्दिनजीवने कथं करणीयानि, तेषां शास्त्रीयाधारः कः, अकरणे किं फलम्, अनुष्ठानेन किं पुण्यम्—इत्येतत् सर्वं स्पष्टतया निरूपितम्।

नित्यकर्माणि निष्कामभावेन प्रतिदिनम् अनुष्ठेयानि। तेषामकरणेन प्रत्यवायनामकं पापं भवतीति धर्मशास्त्रेषु प्रतिपादितम्। अतः नित्यकर्मपालनं केवलं धार्मिककर्तव्यं न, किन्तु आत्मशुद्धेः, समाजहिताय, संस्कृतिरक्षणस्य च मूलकारणमिति वक्तुं शक्यते।

**४. नित्यकर्मस्वरूपम्**

'नित्यम्' इति शब्दस्य अर्थः प्रतिदिनम् अवश्यमनुष्ठेयम् इति। यानि कर्माणि फलाकाङ्क्षां विना प्रतिदिनं विधिपूर्वकं कर्तव्यानि, तानि नित्यकर्माणि इति धर्मशास्त्रेषु निर्दिश्यन्ते। एतानि कर्माणि मानवस्य आचारशुद्धिं, मनःशुद्धिं, चित्तैकाग्रतां, भगवद्भक्तिं च संवर्धयन्ति।

धर्मशास्त्रेषु विहितकर्मणामनुष्ठानं धर्मस्य प्रधानलक्षणं मन्यते। याज्ञवल्क्यस्मृतौ उक्तम् -

**विहितस्याननुष्ठानान्निन्दितस्य च सेवनात्।**
**अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति॥** २१९॥ (याज्ञवल्क्यस्मृतिः - प्रायश्चित्ताध्यायः - श्लोकः २१९ )

अस्य भावः—विहितनित्यकर्मणामकरणेन तथा निषिद्धकर्मणामाचरणेन मनुष्यः अधर्ममार्गे पतति।

भगवद्गीतायामपि भगवान् श्रीकृष्णः कर्मणः अनिवार्यत्वं प्रतिपादयन् वदति—

**नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।** (भगवद्गीता ३.८)

अतः नित्यकर्माणि केवलं शास्त्राज्ञारूपाणि न, अपितु मानवजीवनस्य आध्यात्मिकोन्नतेः, सामाजिकव्यवस्थायाः, नैतिकमूल्यरक्षणस्य च आधारस्तम्भाः भवन्ति।

**५. नारदपुराणस्य परिचयः**

अष्टादशमहापुराणेषु नारदपुराणम् षष्ठं महापुराणं मन्यते। वैष्णवप्रधानमिदं सात्विकपुराणं धर्मभक्तिज्ञानवैराग्यादिविषयाणां समन्वयात्मकं महत्त्वपूर्णं पुराणमस्ति। पुराणस्यास्य वक्तारः सनक-सनन्दन-सनातन-सनत्कुमाराः चत्वारः ब्रह्ममानसपुत्राः, श्रोता च देवर्षिः नारदः। धर्मजिज्ञासया नारदेन पृष्टाः कुमाराः लोकहिताय धर्मस्य, भक्तेः, नित्यकर्मणां च रहस्यानि विस्तरेण निरूपयन्ति। अतः अयं ग्रन्थः प्रश्नोत्तररूपेण प्रवर्तते।

नारदपुराणं द्विभागात्मकम् अस्ति—पूर्वभागः तथा उत्तरभागः। पूर्वभागे १२५ अध्यायाः, उत्तरभागे ८२ अध्यायाः, एवं समग्रतः २०७ अध्यायाः सन्ति। परम्परानुसारं पुराणेऽस्मिन् पञ्चविंशतिसहस्रं (२५,०००) श्लोकाः निर्दिष्टाः, यद्यपि वर्तमानप्रचलितपाठेषु श्लोकसंख्या ततो न्यूनतरा दृश्यते।

पुराणेऽस्मिन् बहवः धर्मप्रधाना विषयाः सम्यक् प्रतिपादिताः। विशेषतः वर्णाश्रमधर्माः, नित्यनैमित्तिककर्माणि, स्नान-सन्ध्योपासन-जप-तर्पण-देवपूजादयः, कृष्णभक्तिमाहात्म्यम्, गङ्गा-माहात्म्यम्, एकादशीमाहात्म्यम्, द्वादशीमाहात्म्यम्, कार्तिकमास-माहात्म्यम्, रुक्माङ्गदोपाख्यानम्, मन्त्रदीक्षाविधिः, वेदाङ्गानां निरूपणम्, विविधदेवताराधनविधयः, कार्तवीर्यार्जुन-कथनम्, श्रीराधासहस्र-नामस्तोत्रम्, अष्टादशमहापुराणानामनुक्र-मणिका, विविधतीर्थानां तथा धाम्नां माहात्म्यानि, वर्णाश्रम-व्यवस्था, आश्रमधर्माः, दानधर्मः, व्रतानि, प्रायश्चित्तविधानम्, मोक्षसाधनानि, योगतत्त्वानि, भक्तिमार्गस्य महिमा इत्यादयो विषयाः विस्तरेण वर्णिताः सन्ति।

**६. नारदपुराणोक्तनित्यकर्माणि**

नारदपुराणे नित्यकर्मणां महत्त्वं बहुधा प्रतिपादितम्। नित्यकर्माणि नाम प्रतिदिनम् अवश्यमनुष्ठेयानि धर्मकर्माणि।

**६.१ ब्राह्ममुहूर्तोत्थानम्**

नित्यकर्मणां प्रारम्भः ब्राह्ममुहूर्तोत्थानेन भवति। ब्राह्ममुहूर्तः सूर्योदयात् पूर्वं प्रायः द्विमुहूर्तकालः भवति। अस्मिन् काले उत्थानं शरीरस्य आरोग्याय, मनसः प्रसन्नतायै, विद्याभ्यासाय, ध्यानाय, जपाय च अत्यन्तं हितकरं मन्यते। नारदपुराणे उक्तं यथा

**ब्राह्मे मुहूर्ते चोत्थाय पुरुषार्थाविरोधिनीम्।** (ना.पु 1.27.2)

धर्मशास्त्रेषु उक्तम्—

**ब्राह्मे मुहूर्ते उत्तिष्ठेत् स्वस्थो रक्षार्थमायुषः।** (अष्टाङ्गहृदयम् 2.1)

अस्य तात्पर्यमिदं यत्—दीर्घायुषः, आरोग्यस्य, धर्मपालनस्य च निमित्तं मनुष्येण ब्राह्ममुहूर्ते एव उत्थातव्यम्।

**ब्राह्मे मुहूर्ते बुध्येत धर्मार्थौ चानुचिन्तयेत्।**
**कायक्लेशांश्च तन्मूलान् वेदतत्त्वार्थमेव च॥** (मनुस्मृतिः 4.92)

नारदपुराणेऽपि प्रातरुत्थानस्य महत्त्वं प्रतिपाद्य, उत्थाय परमेश्वरस्य स्मरणं, स्वात्मचिन्तनं, ततः नित्यकर्मारम्भः विधीयते। ब्राह्ममुहूर्ते उत्थितस्य पुरुषस्य मनः प्रसन्नं भवति, बुद्धिः निर्मला भवति, दिनचर्यापि सम्यगनुष्ठीयते।

अतः ब्राह्ममुहूर्तोत्थानं सर्वेषां नित्यकर्मणां प्रथमसोपानमिति वक्तुं शक्यते।

**६.२ शौचम्**

ब्राह्ममुहूर्तोत्थानानन्तरं शौचाचारः कर्तव्यः। शौचं द्विविधं भवति - बाह्यशौचम् आभ्यन्तरशौचं च। बाह्यशौचेन देहस्य शुद्धिः, आभ्यन्तरशौचेन मनसः, बुद्धेः, चित्तस्य च पवित्रता सम्पद्यते। नारदपुराणे उक्तं यथा

**शौचे यत्नः सदा कार्यः शौचमूलो द्विजः स्मृतः।**
**शौचाचारविहीनस्य समस्तं कर्म निष्फलम्॥** (ना.पु 1.27.2)

मनुस्मृतौ अपि उक्तम् -

**शौचाचारविहीनस्य समस्ताः निष्फलाः क्रियाः।** (दक्षस्मृति 5.2)

अर्थात् शौचाचारं विना कृतानि सर्वाणि कर्माणि निष्फलानि भवन्ति। नारदपुराणे शौचस्य विशेषमहत्त्वं प्रतिपाद्य शुद्धदेहेन, शुद्धवस्त्रेण, शुद्धचित्तेन च देवपूजा, जपः, होमः, स्वाध्यायः, तर्पणादिकर्माणि करणीयानीति निर्दिष्टम्।

शौचाचारस्य पालनं न केवलं धार्मिकदृष्ट्या, अपितु स्वास्थ्यरक्षण-दृष्ट्यापि महत्त्वपूर्णम्। शुद्धिः धर्मस्य प्रथमलक्षणमिति शास्त्रेषु प्रतिपाद्यते।

**६.३ स्नानम्**

शौचानन्तरं स्नानं नित्यकर्तव्यकर्मरूपेण विहितम्। स्नानं शरीरस्य मलापहरणं करोति, मनसः प्रसन्नतां जनयति, धार्मिककर्मणामधिकारं च ददाति। अतः सर्वेषां वैदिककर्मणां पूर्वं स्नानं विधीयते।

**न च स्नानं विना पुंसां प्राशस्त्यं कर्म संस्मृतम्।**
**होमे जप्ये विशेषेण तस्मात्स्नानं समाचरेत्॥**

- गरुडपुराणम्, पूर्वखण्डम्, ५०.७।

अस्य भावः - स्नानं कृत्वैव धार्मिकाणि कर्माणि अनुष्ठेयानि। स्नानाभावे कर्मणां प्राशस्त्यं न भवति। विशेषतः होमस्य जपस्य च

कृते स्नानम् आवश्यकम् अस्ति। अतः सर्वदा कर्मानुष्ठानात् पूर्वं स्नानं करणीयम्। नारदपुराणे उक्तं यथा

**ततः स्नानं प्रकुर्वीत नद्यादौ विमले जले।।** (ना.पु 1.27.2)

नारदपुराणे प्रातःस्नानस्य महिमा विस्तरेण वर्णितः। गङ्गादिषु पुण्यतीर्थेषु स्नानं विशेषपुण्यप्रदमुक्तम्। तथापि गृहस्थस्य नित्यस्नानमपि धर्मरक्षणाय आवश्यकमिति प्रतिपादितम्। स्नानसमये भगवन्नामस्मरणं, तीर्थस्मरणं, मन्त्रोच्चारणं च करणीयमिति पुराणकारस्य निर्देशः।

**६.४ आचमनम्**

स्नानानन्तरम् आचमनं नित्यकर्मणामेकमङ्गम्। आचमनस्य मुख्योद्देशः आन्तरिकशुद्धिः, इन्द्रियनिग्रहः, देवस्मरणं च। वैदिककर्मसु आचमनं विना कर्मारम्भो न विधीयते। नारदपुराणे उक्तं यथा -

**प्रक्षाल्य प्रक्षिपेद्दूरे भूयश्चाचम्य पूर्ववत् ।** (ना.पु 1.27.30)

स्मृतिषु निर्दिष्टम् -

**आचम्य प्रयतो नित्यमुभे सन्ध्ये समाहितः।** (मनुस्मृतिः 2.222)

आचमनेन वाक्, मनः, कायः च पवित्रतां प्राप्नुवन्ति। ततः संध्योपासना, जपः, देवपूजा, तर्पणं, स्वाध्यायश्च विधिपूर्वकं सम्पद्यन्ते। नारदपुराणे आचमनस्य महत्त्वं प्रतिपाद्य विष्णुस्मरणपूर्वकमेव आचमनं करणीयमिति निर्दिष्टम्। अनेन साधकस्य अन्तःकरणं निर्मलं भवति तथा भगवत्सान्निध्यस्य अनुभूतिरपि वर्धते।

**६.५ संध्योपासना**

नित्यकर्मसु संध्योपासना सर्वोपरि स्थानं लभते। प्रातः, मध्याह्ने, सायं च त्रिकालं संध्यावन्दनं द्विजानां नित्यकर्तव्यं धर्मकर्म अस्ति। अस्याः मुख्याङ्गानि आचमनम्, प्राणायामः, मार्जनम्, अर्घ्यप्रदानम्, गायत्रीजपः, उपस्थानम् इत्यादीनि भवन्ति। नारदपुराणे उक्तं यथा

**कुशासने समाविश्य संध्याकर्म समारभेत् ।**
**ईशानाभिमुखो विप्र गायत्र्याचम्य वै द्विज ॥** (ना.पु 1.27.38)

धर्मशास्त्रेषु प्रसिद्धम् -

**सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु ।**
**यदन्यत्कुरुते कर्म न तस्य फलभाग्भवेत् ॥**

दक्षस्मृतिः अध्यायः २, श्लोकः २७.

अर्थात् यः संध्योपासनां न करोति, सः अन्येषां वैदिककर्मणामधिकारं न प्राप्नोति।

नारदपुराणे संध्योपासनाया महत्त्वं बहुधा प्रतिपादितम्। गायत्रीमन्त्रजपः संध्याया मुख्यतममङ्गं मन्यते। संध्योपासनया मनसः शुद्धिः, इन्द्रियनिग्रहः, भगवद्भक्तिः, आत्मबलवृद्धिश्च भवति। सूर्याय अर्घ्यप्रदानेन तमोगुणस्य क्षयः, सत्त्वगुणस्य वृद्धिश्च भवतीति पुराणेषु वर्णितम्। अतः संध्योपासना न केवलं कर्मकाण्डः, अपि तु आत्मानुशासनस्य, ध्यानस्य, ब्रह्मचिन्तनस्य च उत्कृष्टः साधनमार्गः इति निष्कर्षः।

**६.६ गायत्रीमन्त्रजपः**

सन्ध्योपासनायाः प्राणभूतम् अङ्गं गायत्रीजपः। गायत्री वेदमाता इति प्रसिद्धा। सा बुद्धेः प्रकाशिका, पापक्षयकरी, मोक्षमार्गस्य प्रदर्शिका च मन्यते। नारदपुराणे गायत्रीमन्त्रस्य महिमा बहुधा वर्णिता। विशेषतः द्विजानां प्रतिदिनं श्रद्धया, नियमेन, एकाग्रचित्तेन च गायत्रीजपः कर्तव्य इति निर्देशः क्रियते।

भगवद्गीतायामपि भगवान् श्रीकृष्णः जपस्य महत्त्वं प्रतिपादयन् वदति -

**यज्ञानां जपयज्ञोऽस्मि।** (भगवद्गीता १०.२५)

अस्य तात्पर्यम् - समस्तयज्ञानां मध्ये जपयज्ञः श्रेष्ठतमः। अतः गायत्रीजपः न केवलं वैदिकपरम्परायाः संरक्षणाय, अपितु अन्तःकरणशुद्धये, चित्तैकाग्रतायै, ब्रह्मतेजसः वृद्धये च अत्यन्तोपयोगी भवति। नारदपुराणस्य दृष्ट्या गायत्रीजपेन मनुष्यः धर्मे दृढतां प्राप्नोति तथा भगवत्कृपायाः पात्रं भवति।

**६.७ देवपूजा -**

देवपूजा नित्यकर्मणां प्रमुखमङ्गमस्ति। ईश्वरस्य प्रति भक्तिभावस्य अभिव्यक्तिः देवपूजया भवति। नारदपुराणे विष्णोः, शिवस्य, देव्याः, सूर्यस्य च पूजाविधानानि सविस्तरं निरूपितानि सन्ति। पूजायाः पूर्वं शौचम्, स्नानम्, आचमनम्, आसनशुद्धिः, मन्त्रजपः च विधेयाः।

देवपूजया मनःप्रसादः, पापक्षयः, पुण्यवृद्धिः, भगवदनुग्रहश्च लभ्यन्ते। पूजा न केवलं बाह्यकर्म, अपि तु अन्तःकरणस्य भगवति समर्पणमिति पुराणकारस्य अभिप्रायः। श्रद्धा, शुचिता, विनयः, भक्तिः च पूजायाः मूलतत्त्वानि वर्तन्ते। नारदपुराणे प्रतिपाद्यते यत् नित्यं भगवतः स्मरणं, पूजनं, स्तवनं च मानवजीवनं पवित्रयति। अतः देवपूजा नित्यधर्मस्य अविभाज्याङ्गत्वेन स्वीकृता।

**६.८ ब्रह्मयज्ञः**

पञ्चमहायज्ञेषु ब्रह्मयज्ञः प्रथमः परिगण्यते। अस्य स्वरूपं वेदाध्ययनं, वेदमन्त्राणां स्वाध्यायः, ऋषीणां च स्मरणं भवति । ब्रह्मयज्ञेन ऋषिऋणस्य परिहारः भवति। वेदाः ऋषिभिः अस्मभ्यं प्रदत्ताः अतः तेषां नित्यस्मरणं तथा अध्ययनं प्रत्येकं द्विजस्य कर्तव्यम्।

तैत्तिरीयोपनिषदि स्पष्टमुक्तम् -

**स्वाध्यायान्मा प्रमदः।** (तैत्तिरीयोपनिषद्, अनुवाकः ११) (१.११.१)

अस्य भावः – स्वाध्यायःकदापि न त्याज्यः

नारदपुराणे ब्रह्मयज्ञस्य महत्त्वं प्रतिपाद्य वेदविद्याया संरक्षणं, धर्मज्ञानस्य संवर्धनं, ऋषिपरम्परायाः पालनं च अस्य प्रमुखफलत्वेन निरूपितम्। ब्रह्मयज्ञः न केवलं वेदपाठः, अपि तु ज्ञानोपासनाया एकं पवित्रं साधनम्।

**६.९ वैश्वदेवः**

वैश्वदेवः गृहस्थस्य नित्यकर्तव्येषु एकः प्रमुखः धर्मः। अन्नस्य सिद्धेरनन्तरं देवभूतप्राणिभ्यस्तस्यांशः समर्प्यते। अनेन देवऋणस्य तथा भूतऋणस्य परिहारः भवति।

नारदपुराणे उक्तं यथा

**देवार्चनं ततः कुर्याद्वैश्वदेवं यथाविधि ।**

**तत्रातिथिं सम्यगन्नाद्यैश्च प्रपूजयेत् ॥** (ना.पु 1.27.70)

वैश्वदेवकर्मणा सर्वभूतेषु दयाभावः, समत्वदृष्टिः, परोपकारबुद्धिश्च वर्धते। नारदपुराणे गृहस्थजीवनस्य आधाररूपेण अस्य कर्मणः महत्त्वं प्रतिपादितम्। यः वैश्वदेवं विधिपूर्वकं करोति, तस्य गृहे शान्तिः, समृद्धिः, धर्मवृद्धिश्च भवतीति प्रतिपाद्यते। अतः वैश्वदेवः न केवलं वैदिकविधिः, अपि तु सामाजिकसमरसतायाः तथा जीवदयायाः प्रतीकः इति मन्तव्यम्।

**६.१० अतिथिसत्कारः**

भारतीयधर्मपरम्परायाम् अतिथिसत्कारः परमः धर्मः परिगण्यते। तैत्तिरीयोपनिषदि -

**अतिथिदेवो भव।**

इति प्रसिद्धोऽयं उपदेशः।

नारदपुराणानुसारं गृहस्थेन गृहमुपागतः अतिथिः श्रद्धापूर्वकं ससम्मानं च यथासामर्थ्यं पूजनीयः। तस्मै अन्नस्य, जलस्य च प्रदानं, प्रियवचनैः सम्भाषणम्, समुचितः सम्मानश्च अतिथिसेवायाः प्रमुखाः विधयः कथिताः। अतिथिपूजनं सामाजिकसौहार्दस्य, दानशीलतायाः, मानवतायाश्च उत्कृष्टम् उदाहरणम्। यत्र अतिथयः पूज्यन्ते, तत्र देवताः अपि प्रसन्नाः भवन्तीति धर्मग्रन्थेषु प्रतिपादितम्। अतः अतिथिसत्कारः नित्यधर्मस्य महत्त्वपूर्णो भागः इति निश्चितम्।

**६.११ पितृतर्पणम्**

पितृतर्पणं नित्यकर्मणाम् अत्यन्तमहत्त्वपूर्णम् अङ्गम् अस्ति। सनातनधर्मे देवऋणं, ऋषिऋणं, पितृऋणं चेति त्रीणि ऋणानि प्रतिपादितानि। तेषु पितृऋणस्य परिहारार्थं तर्पणस्य विधानं धर्मशास्त्रेषु विहितम्। नारदपुराणे पितॄणां स्मरणं, श्रद्धया जलतिलादिभिः तर्पणं, तेषामाशीर्वादप्राप्तिश्च विस्तरेण वर्णिता। तर्पणेन पितरः तृप्तिं यान्ति, कुलस्य अभ्युदयः भवति, सन्ततिवृद्धिः, आयुरारोग्यसम्पदः च वर्धन्ते इति पुराणेषु प्रतिपादितम्। श्रद्धया कृतं तर्पणं पितॄणां प्रति कृतज्ञताभावस्य प्रतीकः भवति। अतः पितृतर्पणं कुलपरम्परासंरक्षणस्य, पितृसम्मानस्य, धार्मिकजीवनस्य च महत्त्वपूर्णम् अङ्गमिति मन्तव्यम्।

**६.१२ स्वाध्यायः**

वेदाः, उपनिषदः, भगवद्गीता, पुराणानि, स्मृतिग्रन्थाश्च श्रद्धया नित्यं पठनीयाः। स्वाध्यायेन ज्ञानवृद्धिः, विवेकः, धर्मनिष्ठा, आत्मविकासश्च सम्पद्यन्ते।

तैत्तिरीयोपनिषदि स्पष्टमुक्तम्

**स्वाध्यायान्मा प्रमदः।**

अर्थात् स्वाध्याये कदापि प्रमादः न कर्तव्यः। नारदपुराणे स्वाध्यायस्य महत्त्वं प्रतिपाद्य धर्मज्ञानं विना जीवनं निष्फलमिति निरूपितम्। यः नित्यं शास्त्राध्ययनं करोति, स धर्ममार्गे स्थिरो भवति, तस्य बुद्धिः निर्मला भवति, आचरणं च सदाचारयुक्तं भवति। अतः स्वाध्यायः न केवलं ज्ञानार्जनसाधनम्, अपि तु चारित्रनिर्माणसंस्कारसंवर्धनाध्यात्मिकोन्नतेः श्रेष्ठोपायः।

**६.१३ दानम्**

दानं धर्मस्य प्रमुखलक्षणेषु अन्यतमम् अस्ति। श्रद्धया, शुद्धमनसा, यथाशक्तिश्च दानं कर्तव्यमिति धर्मशास्त्रेषु प्रतिपादितम्। नारदपुराणेऽन्नजलगोविद्यासुवर्णादिदानानां महिमा बहुधा वर्णितः। भगवद्गीतायाम् उक्तम् -

**दातव्यमिति यद्दानं दीयतेऽनुपकारिणे।**

**देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम्॥**

(भगवद्गीता १७.२०)

अस्य भावः— फलप्रत्याशारहितया कर्तव्यभावनया, देशकालपात्रविचारपूर्वकं श्रद्धया च यद्दानं योग्येभ्यः पात्रेभ्यश्च प्रदीयते, तद्दानं सात्त्विकमिति प्रतिपादितम्। नारदपुराणे दानं लोककल्याणपरोपकारपुण्यवृद्धिसाधनत्वेन प्रतिपादितम्। दानशीलता मानवस्य उदारतां, दयाभावं, सामाजिकसमरसतां च वर्धयति। अतः दानं नित्यजीवने अवश्यमनुष्ठेयं धर्मकर्म इति निष्कर्षः।

**७. नारदपुराणोक्तनित्यकर्मणां शास्त्रीयविमर्शः**

नारदपुराणे प्रतिपादितानि नित्यकर्माणि न केवलं धार्मिकविधानानि, अपि तु वैदिकपरम्परायाः व्यवहारिकरूपाणि सन्ति। वेदेषु विहिताः धर्माः स्मृतिपुराणादिषु सुबोधतया व्याख्याताः। तेषामेव व्यवहारोपयोगि स्वरूपं नारदपुराणे दृश्यते। ब्राह्ममुहूर्तोत्थानं स्वास्थ्यरक्षणाय, शौचस्नानादीनि शरीरशुद्धये, संध्योपासना गायत्रीजपश्च मनःशुद्धये, देवपूजा भगवद्भक्तये, स्वाध्यायः ज्ञानवृद्धये, पितृतर्पणं कृतज्ञतायै, दानं परोपकाराय, वैश्वदेवः सर्वभूतहिताय च विधीयन्ते। एवं नित्यकर्माणि मानवजीवनस्य सर्वाङ्गीणविकासाय कल्पन्ते। धर्मशास्त्रेषु नित्यकर्मणामकरणं प्रत्यवायदोषहेतुरिति प्रतिपादितम्। भगवद्गीतायामपि कर्मणः अनिवार्यता प्रतिपादिता -

**नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः।** (भगवद्गीता ३.८)

नारदपुराणस्य अभिप्रायेण धर्मः न केवलं सैद्धान्तिकविचारः , अपि तु मानवजीवने आचरणेन अनुसरणीयः व्यवहाररूपः मार्गः। धर्मस्य वास्तविकं स्वरूपं तु नित्यकर्मणां सम्यक् पालनादेव प्रकट्यते। अतः नित्यकर्मपालनं धर्मस्य मूलाधारः, जीवनशुद्धेः साधनं, धर्माचरणस्य च प्राणभूतं तत्त्वमिति स्पष्टं भवति।

नित्यकर्माणि मनुष्यस्य व्यक्तित्वविकासे, पारिवारिकजीवने, सामाजिकसमरसतायां, आध्यात्मिकसाधनायां च अमूल्यं योगदानं कुर्वन्ति। एतानि नित्यकर्माणि अनुशासनशीलता-समयपालन-शौचाचार-दयाभाव-विनय-श्रद्धा-कर्तव्यपरायणतादीनां सद्गुणानां विकासं संवर्धयन्ति।

अतः नारदपुराणोक्तनित्यकर्मणां शिक्षाः अद्यापि विशेषरूपेण प्रासङ्गिकाः सन्ति।

**८. उपसंहारः**

नारदपुराणं सनातनधर्मस्य महत्त्वपूर्णेषु ग्रन्थेषु अन्यतममस्ति। पुराणेऽस्मिन् प्रतिपादितानि नित्यकर्माणि न केवलं वैदिकधर्मस्य व्यवहारिकरूपाणि, अपि तु मानवजीवनस्य सर्वाङ्गीणविकासस्य आधारभूततत्त्वानि सन्ति। ब्राह्ममुहूर्तोत्थानादारभ्य रात्रिशयनपर्यन्तं यानि कर्माणि विधिपूर्वकं कर्तव्यानि, तेषां सम्यगनुष्ठानं धर्मजीवनस्य मूलाधारत्वेन निरूपितम्। नित्यकर्मणां नियमितानुष्ठानेन देहस्य शौचम्, मनःप्रसादः, बुद्धेः निर्मलता, चित्तस्य स्थैर्यम्, आत्मनः परिष्कारश्च भवति। संध्योपासना, गायत्रीजपः, देवपूजा, स्वाध्यायः, ब्रह्मयज्ञः, वैश्वदेवः, पितृतर्पणं, दानम्, अतिथिसत्कारः इत्येतानि कर्माणि व्यक्तेः आध्यात्मिकमेव न संवर्धयन्ति, अपि तु सामाजिकसमरसतां, पारिवारिकसंस्कारान्, परोपकारभावनां, लोकसङ्ग्रहं च दृढीकुर्वन्ति।

नारदपुराणस्य विशेषता एषा यत् अत्र धर्मः केवलं सैद्धान्तिकरूपेण न प्रतिपाद्यते, अपि तु दैनन्दिनजीवने कथम् आचरितव्यः इति स्पष्टतया निरूप्यते। अतो नित्यकर्माणि धर्मस्य सजीवरूपाणि इति वक्तुं शक्यते। एतेषां कर्मणामनुष्ठानेन मनुष्यः आत्मानं शुद्ध्यति, समाजं सेवते, भगवन्तं च प्रीणाति।

अद्यतनवैज्ञानिकयुगेऽपि नारदपुराणोक्तनित्यकर्मणां प्रासङ्गिकता न्यूना न जाता। प्रातरुत्थानम् आरोग्यस्य, शौचाचारः स्वच्छतायाः, संध्योपासना मानसिकशान्तेः, स्वाध्यायः ज्ञानवृद्धेः, दानं सामाजिक-सौहार्दस्य, अतिथिसत्कारः मानवतायाः, पितृतर्पणं सांस्कृतिक-परम्परायाः संरक्षणस्य च साधनत्वेन अद्यापि महत्त्वपूर्णानि सन्ति।

अतः निष्कर्षरूपेण वक्तुं शक्यते यत् नारदपुराणोक्तनित्यकर्माणि न केवलं धार्मिकविधानानि, अपि तु आदर्शजीवनस्य, सदाचारस्य, आध्यात्मिकोन्नतेः, सामाजिककल्याणस्य च स्थिराधाराः सन्ति। तेषां पालनं प्रत्येकधर्मनिष्ठस्य मानवस्य परमं कर्तव्यमेव।

**सन्दर्भग्रन्थसूची**


1. नारदपुराणम्, श्रीवेङ्कटेश्वर-स्ट्रीम-प्रेस्, मुम्बई।
2. मनुस्मृतिः, कुल्लूकभट्ट-टीकासहिता, चौखम्बा संस्कृत संस्थान, वाराणसी।
3. याज्ञवल्क्यस्मृतिः, मिताक्षरासहितम्, चौखम्बा संस्कृत संस्थान।
4. वाग्भटः,अष्टाङ्गहृदयम्,'निर्मला'-हिन्दीव्याख्यासहितम्,चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, २०२२।
5. भगवद्गीता, गीता प्रेस, गोरखपुर।
6. श्रीदक्षस्मृतिः। मोहनप्रसादसप्कोटा। अन्तर्जालस्रोतः (Online), Internet Archive, 2022.
7. तैत्तिरीयोपनिषद्, शाङ्करभाष्यसहिता, गीता प्रेस।
8. महाभारतम्, आदिपर्व, भाण्डारकर ओरिएण्टल रिसर्च इन्स्टिट्यूट, पुणे।
9. धर्मसिन्धुः, काशीनाथोपाध्यायः। धर्मसिन्धुः। मिहिरचन्द्र-खेमराज-विरचितभाषाटीकासहितः। अन्तर्जालस्रोतः